Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 5 | ISSN : 2581- 6306

# उपसर्ग-निपातार्थ विवेचनम्

डॉ. सांवरिया लाल शर्मा
व्याकरणाचार्यः, अध्यापक,
राजकीय बालिका उच्च प्राथमिक विद्यालय,
सदारा केकड़ी , अजमेर,
राजस्थान,भारत।



**Article Info**
Volume 3, Issue 5
Page Number: 287-290

**Publication Issue :**
September-October-2020

**Article History**
Accepted : 10 Sep 2020
Published : 20 Sep 2020

**सारांशः** – शब्दशक्तिप्रकाशिकाकारः अपि निपातानामर्थविषये एवं प्रत्यपादयत् यत् चादीनां निपातानामपि केवलेन अर्थबोधने सामर्थ्य न भवति किन्तु प्रातिपदिकार्थेन सह अन्वयेनैव। इमे च निपाताः अनेकविधः स्वरादिचादिभेदेन। यद्यपि अन्यनैयायिकाः प्रादीनां धातोः प्राक् प्रयुक्तानामुपसर्गाणां द्योतकत्वं स्वीकुर्वन्ति, चादीनाञ्च वाचकत्वं "साक्षात् प्रत्यक्षतुल्ययोः"[10] इति अमरकोशबलात्। परञ्च वैयाकरणानामत्र आपत्तिः ।

**मुख्यशब्दः** –उपसर्गःनिपातः, शब्दशक्तिः, सूत्रम्, पाणिनि, व्याकरणम्।

---

उपसगार्थविचारम् - उपसर्गाःक्रियायोगे (१–४–५८) इति पाणिनिसूत्रेण प्रादीनां क्रियायोगे उपसर्गसंज्ञा विधीयते। प्रादय इमे सन्ति– "प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप" इति।
सूत्रे क्रियायोगे इत्यस्य क्रियाऽन्वये सतीत्यर्थः। प्रसङ्गादुपसर्गार्थ इहैव विविच्यते

(1) प्र -

प्रआदिकर्मदीर्घेशेभृशसम्भवतृप्तिषु।
वियोगशुद्धिशक्तीच्छाशान्ति पूजाग्रदर्शने॥ इति ।

अयमर्थः-आदिकर्मणि क्तः-प्रयातः दीर्घ – प्रवला मूषकाः, ईशे-प्रभुर्देशस्य, भृशार्थे प्रवदन्ति दायादः। सम्भवे-हिमवतो गङ्गा प्रभवति, तृप्तौ-प्रभुक्तमन्नम् । वियोगे प्रोषिताः, शुद्धौ प्रसन्नमुदकम्। शक्तौ प्रशक्तो विप्राय। इच्छायां प्रार्थये कन्याम्। शान्तौ प्रशान्तोऽग्निः। पूजायां प्राञ्जलिस्थितः। अग्रे प्रबलम्। दर्शने प्रलोकयति।

(2) परा -

वधे गतौ दर्शने च विक्रमाभिमुखे भृशौ।
अधीनमोक्षणप्राति लोम्येषु परागतः॥ इति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वधे – पराहतः, गतौ – परागतः, दर्शने - परादृष्टः, विक्रमे – पराक्रान्तः, अभिमुखे – परावृतः, भृशे – पराजितः, अधीने – पराधीनः, मोक्षणे – पराकृतः, प्रतिलोभ्ये पराङ्मुखः।

(3) अप -

अपो वियोगे विकृतौ विपरीते निदर्शने।

आनन्दे वर्जने चौर्ये वारणे सम्यगीरितः॥ इति।

वियोगे-अपयाति, विकृतौ-अपकृतवान्, विपरीते-अपशब्दः, निदर्शने अपदिशति, आनन्दे-अपहसति वर्जने-अपत्रिगर्ताद् वृष्टो देवः। चौर्ये-अपहरति। वारणे-अपसहति।

(4) सम् -

संयोगे ऐक्यप्रसवसत्यप्रत्यक्षसिद्धिषु।

भूषाश्लेषस्वीकरणक्रोधाभिमुखवाचिनम्॥ इति।

संयोगे-संगतः पुत्रेण, ऐक्ये-संवदन्ति संख्ये, प्रभवे-संभवत्यग्निः, सत्ये कोष्ठे गां संजानामि, प्रत्यक्षे-संपश्यते, सिद्धौ-संसिद्धिः भूषणे संस्कृता कन्या, आश्लेषे संधत्ते, स्वीकरणे संगृह्णाति, क्रोधे-संक्रुद्धः अभिमुखे-संयाति। ईषदर्थे–अवलम्बते, व्यापतौ-अवकीर्णम् पराभवे-अवघ्नन्ति, वियोगे-अवयातः।

(5) अनु -

वेदाधिष्ठानसामीप्यपश्चाद्भावानुबन्धने।

साम्याभिमुखहीनेषु विसर्गे लक्षणे त्वनु॥ इति।

वेदे-अनुवाकमधीते, अधिष्ठाने-अनुष्ठानं देशे, सामीप्ये अनुमेघं वर्षति, पश्चाद्-अनुरथम्, भावानुबन्धने-अनुशयः साम्ये अनुकृतिः अभिमुखे-अनुवत्सो मातरं धावति, हीने-अन्वर्जुनं योद्धारः, विसर्गे–अनुज्ञातः, लक्षणे-अनुधनमसतां गतिः।

(6) अव -

ज्ञानावलम्बशुद्धीषदर्थे व्याप्तिपराभवे।

अवो ज्ञेयो वियोगे च लोकयोगानुसारतः॥ इति।

ज्ञाने-अवगतोऽर्थः। अवलम्ब्ये-यष्टिमवधारयति गच्छत्ति, शुद्धौ-अवदातम्, ईषदर्थे –अवलम्बते, व्यापतो-अवकीर्णम्, पराभवे-अविघ्नन्ति, वियोगे-अवयातः।

(7/8) निस्/निर् -

निर्वियोगात्ययादेशातिक्रमे लाभनिश्चिते॥ इति।

वियोगे-निःसङ्गो ब्रवीति अत्यये-निमेघम्, आदेशे-निर्दिष्टम्, अतिक्रमे–निष्क्रान्तः, लाभे-निर्वेशः, निश्चिते, निश्चितम्।

(9/10) दुस्/दुर् -

दुरीषदर्थेकृच्छ्रेर्थे कृशासम्पत्तिसङ्कटे॥ इति।

इर्षदर्थे-दुर्गतः, कृच्छ्रेर्थे–दुजीविनः कृशे-दुर्बलः, असम्पत्तौ-दुर्गतः, सङ्कते -दुर्दिनम्।

(11) वि -

नानावियोगातिशयभृशमोद्देशे वाङ्मधे।

पैशून्यास्मरणेभूषणेषदर्थनाभिमुख्यके॥

अनवस्थामुख्यशौर्यदर्शने विरूदाहृतः॥ इति ।

नाना - विचित्रा सूत्रस्य कृतिः वियोगे - वियुक्तः, अतिशये – विकीर्णः, भृशे-वितटा नद्यः, उद्देशे-विमनस्कः, वाचि – विभुः,मृधे – विवदन्ति, पैशून्ये विगायति, अस्मरणे - विस्मृतः, भूषणे - विभूषितः, ईषदर्थे - विलेपितः, अभिमुख्यके - विमुखः, अनवस्थायाम् - विभ्रान्तः, मुख्ये - विशिष्टः, शौर्ये विक्रान्तः, दर्शने-विलोकयति।

(12) आङ् -

आङिच्छाभयवाक्येषदाश्लेषादिकर्मणि।

बन्धनेऽभिविधौ शाठ्यकृच्छ्रसामीप्यसंश्रये॥

अभिमन्ननिवृत्त्याशादानानुभवविस्मये।

प्रतिष्ठादेशमर्यादास्पर्धामुख्योर्ध्वकर्मणि| इति।

इच्छायाम्-आकाङक्षते भये-आविग्नः, वाक्ये आजानाति, ईषदर्थे आताम्रनखा, आश्लेषे-आलिङ्गति, आदिकर्मणि-आरभते, बन्धने-कवचमाव ध्नन्ति। अभिविधौ आकुमारं यशः पाणिनेः, शाठ्ये-आचरति कपटेन, कृच्छ्रे आकृतः, सामीप्ये-आसन्ना वयम्। संश्रये-आवस्थः, अभिमन्नो-आमन्त्रणे, निवृतौ-आधावति, आशायाम्-आशास्ते, दाने-आदत्ते, अनुभवे-आशीतम्, विस्मये-आ एवं किल तत् प्रतिष्ठायाम्-आस्पदम्, आदेशे-आदिष्टः, मर्यादायाम्-आमुक्तेर्दुःखम्, स्पर्धायाम् आह्वयन्ते रथिनः, मुख्ये-आगच्छति, उर्ध्वकर्मणि-आरोहति पर्वते।

(13) नि -

राश्यघस्त्वभृशादेशनित्यकौशलबन्धने।

अन्तर्भावे समीपे निदर्शने परमाश्रये॥ इति।

राशौ–निकरो मणीनाम्। अघः-निपतितम्, अमृषे-निगृहीतः, आदेशे निदेशितम्, नित्ये-निविशते, कौशले-निपुणः बन्धने-निबद्धः, अन्तः-निपीतमुदकं सिकताभिः भावे-निकृष्टः समीपे-निर्दर्शनम्, परमे–निवृत्तः, पापात् आश्रये-निलयः।

(14) अधि -

अधिरध्ययनैश्वर्यवशितस्मरणाधिके।

अध्ययने - उपाध्यायादधीते ऐश्वर्य - अधिपतिः-वशित्वे - अधीनः, स्मरणे मातुरध्येति, अधिके -- अधिकृतम्।

(15) अपि -

अपि सम्भवगर्हाशीर्मृतिभूषा समुच्चये।

सम्भवे – अपयोजनमस्ति गर्हायाम् - अपिपापिन् आशीषि - भद्रमपि, मृतौ- मरणमपि, भूषणे – अपिनाति हारम्।

(16) अति -

विक्रमातिक्रमे बुद्धौ भृशातिशये त्वतिः ।

विक्रमे - अतिस्थः, अतिक्रमे – अतिक्रामति बुद्धौ – अतिगहनम् भृशे अतितप्तम्, अतिशये-अतिमनुते ज्ञानम् ।

(17) सु -

प्रशंसानुमते पूजाभृशाकृच्छ्रशुभेषु सुः ।

प्रशंसायाम् सुरूपः, अनुमते-सुकृतम्, पूजायां सुसाधुः, भृशे-सुतप्तः, कृच्छ्रे सुदुष्करम् शुभे-सुगन्धः।

(18) उत् -

उत् प्राबल्यवियोगोर्ध्वकर्मलाभप्रकाशने।

आश्चर्यमोक्षणे भावे बलप्राधान्यशक्तिषु।। इति।

प्राबल्ये - उबलः, वियोगे - उद्गच्छति, उर्चे - उत्तिष्ठति, शयनात्, लाभे-उत्पन्नम् प्रकाशने-उच्चरति, आश्चर्ये-उत्सुकः, मोक्षणे उद्गतोऽश्वः बले-उत्कः, प्राधान्ये-उदिष्टाः शक्तौ-उत्साहः ।

(19) अभि

अभिपूजाभृशार्थेच्छाव्याधिसाभ्याभिमुख्यके।

सौरूपावचनाहारस्वाध्यायेषु निरूपितः।। इति ।

पूजायाम्-अभिवदति गुरुम्, भृशार्थः-अभियुक्तः, इच्छायाम्- अभिलिप्सते, व्याधौ–अभिस्यन्दो व्याधिः, साम्ये-अभिजातः, अभिमुख्ये–अभिमुखम्, सौरुपे -अभिख्यः, वचने-अभिघनम्, आहारे-अभ्यवहरति, स्वाध्याये-अभ्यस्यति।

(20) प्रति -

सादृश्यादानहिंसांगीकृतौ प्रतिनिधौ क्वचित्।

व्याध्यभिमुख्ययोर्व्याप्तौ वारणे प्रतिरूच्यते।। इति ।

साद्व्श्ये-प्रतिदेवदन्तस्य, आदाने-प्रतिगृह्णाति, हिंसायाम्-प्रतिहन्ति, अङ्गीकृतौ–प्रतिज्ञानम्, प्रतिनिधौ-अभिमन्युरर्जुनमतः प्रति। व्याधौ–प्रतिश्यायम्, अभिमुख्ये-प्रतिसूर्यं गच्छति, व्यापतो–प्रतिकीर्णं पांशुभिः वारणे प्रतिषिद्धः ।

(21) परि -

परिसमन्ततोभावव्याप्तिदोष कथासु च।

भूषाश्लेषे पूजने च वर्णने वसने शुभे।। इति।

क्रमश उदाहरणानि-परिभ्रमति, परिगतोऽग्निामम् परिवादः, परिकरोति कन्याम्, परिष्वजते, परिचरति गुरुम्, परित्रिगर्तेभ्यो वृष्टो देवः, परिघत्ते वासः परिदेवनम्।

(22) उप -

उपः सामीप्यसामार्थ्यव्यादयाचार्यकृतौ मृतौ।

दोषादानक्रियावीप्सारम्भाध्ययनपूजने।। इति।

उदाहरणानि-उपकुम्भं तिष्ठति, उपकरोति मित्रेभ्य, उपकीर्णः पांशुभिः, उपदिशत्येभ्यः उपरतः उपघातः उपहरत्यर्थ देवदत्ताय, उपचारः, देव देवमुपचरति, उपक्रमते भोक्तुम्, उपाध्यायादधीते उपचितः पिता पुत्रेण।

निपातार्थ विचारम्

पाणिनिव्याकरणे “प्राग्रीश्वरान्निपाताः (अष्टा. १-४-५६) इति निपाताधिकार सूत्रमस्ति। अस्यायमर्थ “अधिरीश्वरे” (अष्टा. सू.(१-४-८७) इत्यतः प्राक् निपाता इत्यधिक्रियन्ते, तन्त्राद्याश्रयणात्। तेन पूर्व निपात संज्ञाः सन्तः पश्चात् गत्यादिसंज्ञा इत्यर्थात् संज्ञासमावेशः सिध्यति। अन्यथा गत्युपसर्गकर्म प्रवचनीयसंज्ञानां निपातसंज्ञायाश्च पर्यायः स्यात्। तत्रादौ प्रमाणं तु प्राग्ग्रहणसामर्थ्यमेव। अन्यथा ईश्वरादिति पञ्चम्येव दिशब्दाक्षेपात् किं तेन? न च परशब्दाक्षेपप्रसङ्गः। 'चादयोऽसत्वे प्रादय” इत्येतयोर्विधेययोलाभेनानन्व यापत्तेः। चादयोऽसत्वे' (अष्टा. १-४-५७) इतिसूत्रेण अद्रव्यर्थादीनां निपातसंज्ञा भवति। निपातत्वादव्ययत्वम्। तदुक्तं शब्दकौस्तुभे -

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते।

द्रव्यमिच्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः।।[1] इति ।

लिङ्गसंख्यान्वयि द्रव्यमिति वा। असत्वे किम्? पशुना त्यजेत, पशुशब्दश्चादिः। च समुच्चये इत्यपि प्रत्युदाहरणम्।

चादयस्तु-च/वा/ह/अह/एव/ एवं/ नूनं/शश्वत् / युगपत् /भूयस् / कूपत् / कुवित् / नत्वेत् /चण्/कच्चित् / किञ्चत् / यत्र/नह/हन्त/माकिः/माकिम् / नकि:/आकिम् /नाकिम् /माङ्/नञ् / यावत्/तावत् / त्वै//न्वै/रै/ श्रौष्ट्/ वौषट्/स्वाहा/स्वधा/वषट् /तुम/तथाहि/खलु/किल/अथो/अथ/सुष्टु/ स्म/आदह/

विभक्तिस्वप्रतिरूपकाश्च -

अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि।

सुदत्तमनुदत्तं च निदत्तमिति चेष्यते ॥इति॥

अहं युः/अस्तिक्षीरा/अ/आ/इ/ई/उ/ऊ/ए/ऐ/ओ/औ/पशु/शुकम् / पाट/ प्याट्/अङ्ग/है/हे / भेः/अये/द्य/विषु/एकपदे/युत्/आत् चादिर प्यादिगणः।

जगदीशतर्कालङ्कारस्तु निपातलक्षणमाह –

स्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयाक्षमः ।

सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः" इति।

यादृशार्थे शब्दान्तरार्थस्याभेदेनान्वयबोध जननायोग्यः सुबादिभिन्नो निपात श्चादिभेदेनानेकविध इतिकारिकार्थः। यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थे निपातः । चादयो निपाताः स्वार्थे समुच्चयादौ नामाद्यर्थस्याभेदेनान्वयबोधं प्रत्ययोग्याः, न हि स्मृतमनुभूतश्चेत्यादितः कस्यापि स्मृतः समुच्चय इत्यादिरनुभवः, किन्तु स्मृतानुभूतयोः समुच्चय इत्यादिरेव। स्तोकं पचतीत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थ एव। प्रत्ययस्तु सुबादिरेव। चः शब्द इत्यादौ नामार्थस्याभेदसाकाङ्क्षश्चकारादिः स्वपरतायां न निपातः किन्तु नामैव (तथा सुवादिरपीति)। पुरन्दरप्रभृतौ तु नाम्नि निपातव्यपदेश: सूत्रानिषाद्यत्वप्रयुक्तो भाक्तः। "कार्त्तिक्यादौ यन्न दानं तदत्यन्तविनिन्दित" मित्यादौ न केवले नार्थे यदर्थस्य तादात्म्येनाऽन्वयः किन्तु दानाद्यवच्छिन्ने। स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः, शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात् । प्रादयस्तूपसर्गा न सार्थकाः, सार्थकाश्चेन्निपाता अपि। जातौ सत्ता नास्तीत्यत्र सत्तायां जातिवृत्तित्वस्य समवेतत्वनिरूपितस्वरूप सम्बन्धेनात्यन्ताभावो नत्रा प्रत्याय्यते, न तु सत्त्वस्याभावः प्रथमान्तपदानुपस्थाप्यत्वेन नञर्थे तत्रास्तित्वादिक्रियान्वयस्यायोगात् जातौ जाती न स्त इत्यत्र जातिद्वयत्वावच्छिन्नाभावस्यैकत्वेन तत्र तिङ्डर्थद्वित्त्वस्य पर्याप्तिबाधेनान्वया सम्भवाच्च। सत्ता समवायेन जातौ नास्तीत्यादौ तु समवेतत्वीयस्वरुप सम्बन्धावच्छिन्न प्रतियोगिताकत्वे समवाय शब्दस्य लक्षणं परेषामपि सत्ताभावस्य समवायावच्छिन्नत्वासम्भवेन समवायावच्छिन्नप्रतियोगिताकत्वे तल्लक्षणाया आवश्य कत्वात्। प्रथमार्थ प्रति योगित्वे समवायावच्छिन्नत्वस्य तत्रान्वय इति तु साहसम् प्रथमायाः प्रतियोगितार्थ कत्वस्य क्वचिदप्यकल्पनात्। विशिष्टसत्ता गुणे नास्तीत्यादिकस्तु प्रयोगो यदि प्रमाणं, तदाधेयत्वस्याव्याप्यवृत्तित्वेन द्रव्यवृत्तित्वावच्छेदेन तस्यां गुणवृत्तित्वाभावसत्त्वाद्। विशिष्टस्यातिरिक्तत्वादित्यपि कश्चित्।

न क्रोधो न च मात्सर्यं न लोभो नाशुमा मतिः ।

भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥ इति ।

इत्यादावनेकनञामानर्थक्यप्रसङ्गस्तु -

न तं विरिञ्चिन भवो न श्री पि धनाधिपः।

दातुमर्हन्ति विभवं विष्णोराराधनेन यः॥ इति।

इत्यादाविव प्रकारान्तरवादिनामपि समानः समानसमाधानश्च । पदात् परस्य युष्मदादेस्तेप्रभृत्यादेशविधौ च पदशब्दः साकाङ्क्षनिपातस्याप्युपलक्षकस्तेन "न ते धनं धर्म्य' मित्यादौ न तस्यानुपपत्तिः। सदृशाद्यर्थे निभादेर्निपातत्वव्युदासस्तु प्रागुक्तदिशाशावसेयः।

स चायं निपातश्चतुनपुनरिवैवमहस्मादिभेदाद्बहुविधः॥

ननु यदि प्रकृतिः प्रत्ययो निपातो वा स्वार्थोपस्थितिद्वाराऽन्वयबोधं कुर्यात्, प्रत्यकेमात्रं निराकाङ्क्षशब्दसहकृतं वा किन्न कुर्यात्, मिलितानामेव तेषां तथात्वन्तु सर्वत्राऽसम्भवीत्यत आह -

वाक्यभावमवाप्तस्य सार्थकस्यावबोधतः ।
सम्पद्यते शाब्दबोधो न तन्मात्रस्य बोधतः॥ इति।

सार्थकस्य प्रकृत्यादेर्वाक्यतामापन्नस्यैव स्वार्थोपस्थितिद्वाराऽन्वयबोधकत्वं, न तु प्रत्येकस्य निराकाङ्क्षसहितस्य वा बोधकत्वम्।

उपसर्गाणां - निपातानां वाचकत्वं द्योतकत्वं वा इति विचारम् - प्रादयोऽर्थस्य द्योतकाश्चादयश्चार्थस्य वाचकाः इति नैयायिकाः प्रतिपादयन्ति। "साक्षात् प्रत्यक्षतुल्ययोः" इति कोशात्। 'नमः' पदेन देवाय नमः' इत्यादौ नमस्कारार्थस्य दानावसरे गवे नमः इत्यपूजार्थस्य प्रसिद्धत्वाच्च । द्योतकत्वञ्च -स्वसमभिव्याहृतपदगतवृत्त्युद्बोधकत्वं प्रायेण। समन्वयश्चेत्थं स्वं-द्योतकत्वेनाभिमतमुपसर्गादिपदं तत्सभिव्याहृतपदं धातुपदं तन्निष्ठा वृतिः अनुभवाद्यादिनिरूपिता तस्या उद्बोधकत्वात् भवति उपसर्गाणां लक्षणसमन्वय । प्रादेशं विलिखतीत्यादौ वर्तमानक्रियाक्षेपकः। "प्रादेशं विमाय लिखति" इत्यर्थावगमात्। अत्र कारकविभक्तेः लिखतीति क्रियायोगाभावाद् विमानक्रिया आक्षिप्ये। विमाय परिच्छिद्य लिखधातोर्जीवत्यादिवदकर्मकत्वात् अक्षररूपकर्मणो धात्वर्थोपसंग्रहात्। अत एव 'अथ शब्दानुशासनम्' इत्यत्र अथ शब्दस्य प्रारम्भक्रियाक्षेपकत्वं कैयटाद्युक्तं संगच्छते क्वचित्तु सम्बन्धपरिच्छेदकत्वं द्योतकत्वम्।

अनुभूयते सुखमित्यत्र तस्य तद्वाचकत्वे धातोरकर्मकत्वात् कर्मणि लाद्यनापत्तिः। स्वार्थफलव्यधिकरणव्यापारवाचकस्यैव सकर्मकत्वात्। अन्यथा यत्किञ्चित्फलवैयधिकरण्यस्य सर्वत्र सत्वानतिप्रसङ्गात्। तस्मादुपसर्गाणां द्योतकत्वम्, चादयस्तु वाचका एव। साक्षात्क्रियते इत्यादौ विषयतासम्बन्धेन प्रत्यक्षादिरूपतत्फलवाचकत्वस्य साक्षात्पदादेः सम्भवात् तदुत्पन्नानुकूलो व्यापारो धात्वर्थः तथा च "साक्षात् क्रियते गुरुः" इत्यादौ गुर्वभिन्नाश्रयनिष्ठोविषयतासम्बन्धेन यः साक्षात्कारस्तदुत्पत्त्यनुकूलो व्यापार इत्यादिर्बोध इति प्राहुः तन्न युक्तं वैषम्ये बीजाभावात् अनुभूयते सुखम् साक्षात्क्रियते इत्यस्य समत्वात् नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयभावात् निपातार्थधात्वर्थयोरभेदान्वयव्युत्पत्तिस्तु निपातार्थफलाश्रयत्वेऽपि धात्वर्थान्वयं कर्मत्वानुपपतेश्च । अत उक्तं कौण्डभट्टेन वैयाकरणभूषणसारे -

द्योतका प्रादयो येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा॥[3] इति।

अन्यत्र साक्षात् क्रियतेऽलं क्रियते उरीक्रियते शिव इत्यादौ। अपि धातोस्तदर्थत्वे कर्मणि लकारसिद्धार्थः। तथा चोपसर्गवच्चादिनिपातानामपि द्योतकत्वं युक्तम्। यदि तु निपातसमभिव्याहारे प्रतीयमानेऽर्थे धातोः शक्तिः धातूनामनेकार्थत्वात्, निपातस्तु स्वसमभिवयाहृतपदगतशक्त्युन्नायकः शक्त्युन्नायकत्वं तु शक्त्युद्बोधकत्वं शक्त्युद्बोधकत्वमेव च द्योतकत्वमित्याश्रीयते तर्हि "तत्तदर्थवाचकत्वं' इति यथाश्रुतमेव साधु। यद्यपि कृधातोः सकर्मकत्वमस्त्येव तथाप्येतेष्वर्थेषु सकर्मकता न स्यात्। अन्यथा वायुर्विकुरुते सैन्धवो विकुर्वत इत्यत्रापि स्यात्।

किञ्च प्रादीनां वाचकत्वे भूयान् प्रकर्षः कीदृशो निश्चय इतिवद् भूयान्प्रकीदृशो निरित्यपि स्यात्, घटस्य समुच्चय इतिवत् घटस्य च इत्यापत्तिश्च स्यात् । अस्यायमाशयः-प्राद्युपससमभिव्याहारे प्रतीयमानो योऽर्थस्तत्रार्थे धातोर्लक्षणा प्राद्युपसर्गास्तु द्योतकाः तथा

चादिनिपातसमभिव्याहारे प्रतीयमानेऽर्थे धातोर्लक्षणा, चादिनिपातास्तु द्योतका इत्यभ्युपगमनेन चादिनिपातानामनर्थकत्वन्न तत्र शोभनादि विशेषणान्वय एव नेति कुतो विशेषणतानिरूपितविशेष्यतेति भावः। ततश्च भूयान् प्र. शोभनश्च इत्यादि प्रयोगापत्तिर्नेति तात्पर्यम्। नन्वभेदसम्बन्धेन नामार्थप्रकारकबोधे जननीये निपातातिरिक्तशब्दजन्योपस्थितिः कारणमित्येवं कार्यकारणभावोऽभ्युपगम्यते। अत्र नामार्थप्रकारकबोधः कार्यम्। तत्कारणं च निपातातिरिक्तशब्दजन्योपस्थितिः। भूयान् प्रकर्षः शोभनः समुच्चयः इत्यत्र निपातभिन्नशब्द जन्योपस्थितेः सत्वात् भूयस्त्वभूविशिष्टाभिन्नः प्रकर्षः शोभनान्नाभिन्नः समुच्चयः इत्यर्थप्रतीतेरभेदेन शोभनादि नामार्थप्रकारकः शब्दबोधो जायते इति उक्तम्। भूयान् प्र शोभनश्चेत्यत्र तु निपातजन्याया एवोपस्थितेः सत्वेन कारणाभावान्नाभेदेन नामार्थप्रकारकः शाब्दबोधः कार्य जायते इति निपातानां वाचकत्वेऽपि न काचित्क्षतिः। अपि च निपातानां वाचकत्वे प्रातिपदिकार्थयोर्विना षष्ठ्यादिकं भेदेनान्वासंभवः। अन्यथा "राजपुरुषः इत्यस्य राजसम्बन्धी पुरुष इत्यर्थस्यापत्तेः।

वैयाकरणमते निपातानां द्योतकत्वेन निपातसमभिव्याहारे तत्प्रातिपादिकस्यैव निपातार्थविशिष्टस्वार्थबोधकतया एकपदोपस्थाप्यत्वेनान्वयाभावादेव न घटश्च इत्यादौ भेदेनान्वयरूपो दोषः।

घटश्चेत्यादौ घटपदमेव घटसमुच्चयरूपार्थबोधकम् विना षष्ठ्यादिकं इत्युक्तिस्तु षष्ठ्यादिसत्वे तदर्थद्वारा नामार्थयोरपि भेदेनान्वयो भवत्येवेति बोधनाय | अत एव 'राज्ञः पुरुषः' इत्यत्र राजनिष्ठस्वामितानिरूपितस्वतावान् पुरुष इति स्वस्वामिभावभेदेनान्वयप्रतीतिः संगच्छते। निपातानां वाचकत्वे नामार्थयोविभिन्न विभक्तिकयोर्भेदेनान्वयं धवखदिरयोः समुच्चय इतिवत् धवस्य च खदिरस्य च इत्येव स्यात् अन्यथान्वयोगात्। न तु धवश्च खदिरश्चेत्यर्थः। घट: पटश्चास्तीत्यत्र घटस्यास्तीति क्रियायामन्वयः। अत एव तिङ्समानाधिकरण्यात्तत्र प्रथमा। घट: समुच्चयवान् पटोऽस्तीति बोधः। समुच्चस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वाद् घटस्य प्रतियोगित्वं, पटे तु चार्थ समुच्चयस्य इति निपातानां वाचकत्वेऽपि कथं धवस्य च खदिरस्य चेति षष्ठ्यापादनम्। नामार्थयोरितिव्युत्पत्तिस्तु निपातातिरिक्तविषया।

अत एव 'धातुः पूर्वं साधनेन युज्यते पश्चादुपसर्गेणेति' सिद्धान्तितम्। साधनं कारकं तत्प्रयुक्तकार्येण उपसर्गेण उपसर्गसंज्ञकशब्देन। तत्र हि भाष्ये "पूर्वं धातुरुपसर्गेण युज्यते, पश्चात् साधनेनेति नैतत्सारं, पूर्वं धातुस्साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निवर्तयति तमुपसर्गो विशिनष्टीति सत्यमेवेतत्। उपसर्गात्पूर्वं साधनयोग इति सत्यम् परन्तु धातूपसर्गसम्बन्धकृतोयोऽर्थस्तमभ्यन्तरं कृत्वा स्वबोध्यं कृत्वा साधनयोगे क्रियात्वावगतौ उपसर्गयोगः।

यस्त्वसौ धातूपसर्गयोरभिसम्बन्धमभ्यन्तरं कृत्वा धातुः साधनेन युज्यते अवश्यं चैतदेवं विज्ञेयं यो ह्येवं मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्य आस्यते गुरूणा इत्यकर्मक उपास्येते गुरुरिति केन सकर्मकः स्यादिति। अयं भावः वक्ता धातोरेव विशिष्टमर्थ बुद्धौ कृत्वा साधनसम्बन्धकार्यप्रत्यययोगेन तत्र साध्यत्वावगतौ श्रोतृबोधाय क्रियायोगे निमित्तोपसर्गसंज्ञकशब्दयोगं करोति। अन्यथा केवलधातुतः सर्वत्राप्रतीयमानतया श्रोतुस्तद्बोधो न स्यात्। तदुक्तं भूवादयो धातुः इति सूत्रे कैयटेन अनेकार्थत्वाद्धातूनां विशिष्टोऽर्थो धातोरेव, उपसर्गस्तु बोद्धारं प्रति तदर्थद्योतक इति एवञ्चोपसर्गेण योगो नाम तदर्थसम्बन्धः, तत उपसर्गयोगात् पूर्वं साधनकार्ययोगः। तत उपसर्ग शब्दयोग इति। अनेन कैयटेन द्वयोरपि एकार्थप्रतिपादकत्वं समायाति। हरिणाप्युक्तम्

धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा।
धातुत्वं कर्मभावश्च तथाऽन्यदपि दृश्यताम्॥[4]
बुद्धिस्थादभिसम्बन्धात्तथा धातूपसर्गयोः।
अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते ॥[5] इति।

अस्यार्थ:- यथा भाविसाधनसम्बन्धाश्रयणेन क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते, यथा च सन्प्रत्यये चिकीर्षिते भावीषिकर्मत्वमाश्रित्योपक्रमे एवेषिकर्मत्वमुक्तम् तथा भाव्युपसर्ग सम्बन्धादुपक्रमे एवविशिष्टक्रियावाचकत्वं दृश्यताम् धातूपसर्गयोः

सम्बन्धं बुद्धिविषयीकृत्योपसर्गार्थकृतो विशेषो धातुनैवाभ्यन्तरीकृतः पदप्रयोगकाले उपसर्गसम्बन्धे सति प्रकाशते। उपसर्गप्रयोगात् प्रागेव धातुनैवोपसर्गार्थविशिष्टः स्वार्थः उच्यते इति तात्पर्यम्। पूर्वं धातुरूपसर्गेणेति तु तदर्थस्य धात्वर्थान्तरभावाद् व्यवहार: निपातानां द्योतकत्वं वाचकत्वं वेति विचारः। चन्द्र इव मुखमित्यादौ चन्द्रपदस्य स्वसदृशऽप्रसिद्धाशक्तिरेव लक्षणा 'नञिवयुक्तमन्यसदृशाधिकरणे इति न्यायात्। इव पदं तात्पर्यग्राहकम्। तात्पर्यग्राहककत्वञ्च स्वसमभिव्याहृतपद स्यार्थान्तरशक्तिद्योतकत्वम् इत्यागतम् इव निपातस्य द्योतकत्वम्। बोधकत्वेनैवार्थवत्त्वात् प्रातिपदिकत्वं सिद्धम्। अत एव 'निपातस्यानर्थकस्य' इति वार्तिकाद् वा प्रातिपदिकत्वम्। 'कृत्तद्धितसमासाश्चेत्यनुक्तं समुच्चयार्थकचकारेण निपातानां संग्रह इति बोध्यम्। तस्माद्युक्तं निपातानां द्योतकत्वम्। उक्तं चाऽऽकृ त्यधिकरणवार्तिके -

चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः ।<br>
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥<br>
तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।<br>
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते।। इति।<br>
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।<br>
प्रहारहारसंहारविहारपरिहारवत् ॥

इत्युक्तेः उपसर्गपदं निपातोपलक्षणम्। धातुपदं पदान्तरस्येति बोध्यम् । नञिवयुक्तमन्यसादृश्याधिकरणे तथा ह्यर्थगतिरिति न्यायस्वरूपम्। नञ् युक्तम् इव युक्तं च पदं स्वबोध्यार्थभिन्नस्यस्वबोध्यार्थसदृशस्य च बोधकमिति तदर्थः। नञ् पदम् इवपदञ्च तात्पर्यग्राहकम्। तथा ह्यर्थगतिः सादृश्यप्रतियोगितावच्छेदक व्यापकीभूतधर्मेण सादृश्यं ग्राह्यम्। प्रकृते च चालादकत्वं तथाविधोधर्मः। न च चन्द्र इव चन्द्र इत्यापत्तिः चन्द्रत्वस्य चन्द्रत्वव्यापकत्वात्, स्वस्यापि स्वव्यापकत्वनियमादिति वाच्यम्, सादृश्यप्रतियोगितावच्छेदकव्यापकीभूतधर्माश्रय वृत्त्यसाधारणधर्मभिन्नत्वस्य व्यापकीभूतधर्मेण विशेषणत्वेनादोषात्।

वस्तुतस्तु सादृश्यप्रतियोगितावच्छेदकविशिष्टधर्मेण सादृश्यं ग्राह्यम् वै. स्वव्यापकत्वं, स्वभिन्नत्वंस्वव्यापकाव्यापकत्वमेतत् त्रितयसम्बन्धेन प्रमेयत्वस्य सादृश्यप्रयोजकत्व वारणाय तृतीयः सम्बन्धः।

इवार्थसादृश्ये प्रतियोगितानिरूपकत्वसम्बन्धेन चन्द्रपदार्थान्वयः, तस्य चाश्रयतया मुखे। एवञ्च चन्द्रनिष्ठप्रतियोगितानिरूपकसादृश्यवान् मुखमिति बोधः । निपातानां वाचकत्वे लक्षणां विनैव बोधसम्भवे लाघवाद् वाचकत्वमेव युक्तमिति तार्किकतमुपस्थाप्य तन्निराकरोति।

यत्तु इवार्थस्या सा स्वीक्रियमाणे दृश्यं प्रतियोग्यनुयोगिभावेनैव चन्द्रमुखयोरन्वयोपपत्तौ किं लक्षणया तथा च चन्द्रप्रतियोगिकसादृश्याश्रयो मुखमिति बोध परं “चन्द्र इव मुखं दृश्यते; चन्द्रमिवमुखं पश्यामि” इत्यादौ चन्द्रपदस्य मुखरूपकर्मसमानाधिकरण्याभावादुक्तानुक्तत्वविभक्त्यनापत्तिः षष्ठ्यापत्तिश्च स्याताम्। चन्द्रस्येवार्थे सादृश्ये विशेषणत्वेन एकत्रविशेषणं नापरत्रेति सिद्धान्तात् मुखेन समानाधिकरण्यासम्भवात् कर्तृकर्मणोलकार न तदनुरोधिनी विभक्तिः प्रत्युत् भेदे षष्ठ्येव स्यात् । द्योतकत्वमते तु चन्द्रपदस्य चन्द्रसादृश्यवति लक्षणया तस्य चाभेदेन मुखेऽन्वयात् विशेष्यानुरोधिनीविशेषणे विभक्तिरिति सर्वमनवद्यम्।

नागेशस्तु इव शब्दस्योपमानताद्योतकत्वम्। उपमानत्वञ्च-उपमानोप मेयोभयनिष्ठसाधारणधर्मवत्त्वेनेषदितरपरिच्छेदकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वो पमेयत्वम् साधारणधर्मसम्बन्धश्च क्वचिद्विशेष्यतयाऽन्वेति क्वचिद् विशेषणतया एवञ्चन्द्र इवालादकं मुखमित्यादौ आलोदकोपमानभूतचन्द्र भिन्नामाह्लादकं मुखमिति बोधः। 'चन्द्र इव मुखमाहलादयति' इत्यादौ उपमानभूतचन्द्र कर्तृकालादाभिन्नो मुखकर्तृकालादाभिन्नो मुखकर्तृकाहलाद इति बोधः। इदम् “उपमानानि सामान्यवचनैः” इत्यत्र भाष्ये स्पष्टमित्याहुः। अपि च निपातानां वाचकत्वे काव्यादौ अन्वयो न स्यादिति साधकान्तरमाह -

'शरैरुपैरिवोदीच्यानुद्धरिष्यन् रसानिव।'

इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः॥[6] इति।

अत्रोस्रसदृशैः शरैः रससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः। अयञ्चोस्रादि- शब्दानां तत्सदृशपरत्वे इवशब्दस्य द्योतकत्चे सत्येव सङ्गच्छते। अन्यथा प्रत्ययानां प्रकृ त्यर्थाऽन्वितस्वार्थबोधकत्वव्युत्पत्तिविरोधः । तेनोपैरित्यत्र तृतीयाप्रत्ययस्य स्वप्र- कृ तिभूतोस्रपदार्थान्वितकरणबोधकत्वं प्रत्ययानां प्रकृत्यर्थेत्यादिनियमान्न घटते।

तथा हि उैरिति करणे तृतीया। न चास्रोऽत्र करणम्। इवार्थसदृशस्य करणत्वेऽपि तस्य करणत्वं नानेन बोधयितुं शक्यम्। अप्रकृत्यर्थत्वात्। इव शब्दस्य चाऽसत्त्वार्थकतया तदुत्तरं तृतीयाया असम्भवात्। सम्भवे वा श्रवणप्रसङ्गात् । उम्रपदोत्तरतृतीयानन्वयप्रसङ्गाच्चेत्याह सुपां चेति। सुपां श्रवणञ्चेत्यर्थः । चकारादुम्रपदोत्तरतृतीयानन्वयः समुच्चीयते इति कारिकार्थः । "वागर्थाविवसम्पृक्तौ "पार्वतीपरमेश्वरौ वन्दे" इत्यत्र वागर्थयोर्वन्दिकर्मत्वाभावात्तदुत्तरद्वितीयाया अनन्वयः । इवार्थस्य कर्मत्वान्वयबोधकासम्भवश्च संगृह्यते।

अत्रायमाशयः - वागर्थयोरिवार्थेन सहान्वयात्संपृक्तावित्यत्रान्वयाभावेन तयोर्वन्दनक्रियानिरूपितकर्मत्वाभावात् तत्र तदुत्तरकर्मद्वितीयाया अन्वयो न स्यात्। वन्दिक्रियानिरूपितकर्मणा सह वागर्थयोरभेदेनान्वयाभावेनापि कर्मत्वस्य बाधितत्वात्। इवार्थ सदृशस्य पार्वतीपरमेश्वररूपकर्मणा सहाभेदान्वयेन कर्मत्वेऽपि वागर्थपदोत्तरवर्तिद्वितीयायाः इवार्थे यः कर्मत्वान्वयस्तद्बोधकत्वस्यासंभव एव, इवार्थस्य द्वितीयाप्रकृतिभूतवागर्थपदार्थत्वाभावात्। इवार्थस्य द्वितीयाप्रकृत्यर्थत्वा भावातप्रत्ययानां प्रकृत्यान्वितस्वार्थबोधकत्वनियमात्। वागर्थपदार्थेन सह तदुत्तरद्वितीयाया अनन्वयः, तादृशद्वितीयायाश्चेवार्थगतकर्मत्वबोधकत्वासंभवश्च संगृह्यते। अस्माकंमते तु वागर्थपदस्यैव वागर्थसदृशपरतया इव शब्दस्य तद्द्योतकत्वेन च वागर्थसदृशयोरभेदेन पार्वतीपरमेश्वरविशेषणतया वन्दिक्रिया निरूपितं कर्मत्वं सुसंगतम्। तथा उरित्यत्रास्रपदस्यैवोस्रसदृशार्थ कत्वादुस्रसदृशस्याभेदेन शरविशेषणतयोद्धरणक्रियानिरूपितकरणत्वान्न तृतीयानुप यत्तिः निपातानां वाचकत्वे सदृश इव शब्दार्थः। उस्रा उपमानं, शरा उपमेयम् उपमानस्य विशेषणतया उपमेयस्य च विशेष्यतया प्रतीतिरिति स्थितिः। तत्रोपमेय शराणामुद्धरणक्रियायां करणत्वात्तत्र करणकारकवाचिनी तृतीया। उपमानपदात्तु "विभक्तिः पुनरेकैव उपमानोपमेययोः" इति नियमादुपमेयोत्तरविभक्ति सजातीय विभक्तेरेवोचित्तत्वात्तृतीयैव, सा चाभेदार्थिकेत्याशयेनाऽऽह-नीलं कमलं पश्येत्यादौ नीलाभिन्नकमलकर्मकं दर्शनमिति बोधान्नीलकमलयोरभेदान्वयाद्विशेषणविभक्तेरभे दोऽर्थः, न तु कर्मत्वमित्यर्थः। तथा च वागर्थावित्यत्रत्या द्वितीया, उरित्यत्रत्या तृतीया चाभेदार्थिका, न तु कर्मत्ववाचिनी करणत्ववाचिनी वा। ततश्च विशेषण विभक्तेर्द्वितीयायास्तृतीयायाश्चानन्वयो नेति भावः । 'अपदं न प्रयुञ्जीत इति भाष्यात् पदसाधुत्वमात्रसम्पादिका विशेषणविभक्तिरित्यर्थः। सा च विशेष्यवाचकपदोत्तरवि भक्तिसजातीयैव कर्तुमुचिता, विभक्तिः पूनरेकैवेति नियमात्। विशेष्यस्थवभक्ति विरुद्धविभक्तौ क्रियमाणायां तूपमानोपमेययोरभेदान्वयो न स्यात्। अभेदान्वयबोधे विरुद्धविभक्तिराहितत्यस्य प्रयोजकत्वात्। उस्रसदृशानां शराणां समानाधिकरण पदोपस्थाप्ययोः भेदनान्वयायोगात्। बोधादभेदेनापि नसः। नहि उम्राभिन्न सदृशा भिन्नः शरः इति यथा। हि उम्रपदार्थस्य सदृश इवार्थेऽभेदेनान्वये उस्राभि नसदृशस्य शरपदार्थेऽभेदस्य बाधः। तदभिन्नाभिन्नस्य तदभिन्नत्वं तत्-मृत्तिका तदभिन्नं (मृदभिन्न) कपालद्वयं, तदभिन्नः (कपाल द्वयभिन्नः)-घटः, तस्य घटस्य तदभिन्नत्वं मुदभिन्नत्वमितिवदत्र तत् उम्रः तदभिन्नः सदृशः तदभिन्नः-शरः, तादृशशरस्य तदभिन्नत्वं (उस्राभिन्नत्व) घटस्य मृदभिन्नत्वमिव वक्तव्यं, तन्न संभवति। घटे मृदन्वयस्य प्रत्यक्षतोऽनुभूयमानत्वेन मृदभिन्नो घट इति यथा वक्तुं शक्यते, न तथा उस्राभिन्नः शर इति वक्तुं शक्यते, शरे उम्रत्वान्वय स्याननुभवात्। यः सदृश उनाभिन्नोऽस्ति तादृशसदृशस्य शरे कथमभेदः संभवेत, न कथमपि। एवं चोस्राभिन्नसदृशस्य शरेऽभेदान्वयो बाधितः। यदि तु सदृशस्य पूर्व शरेण सहाभेदेनान्वयं कृत्वा सदृशाभिन्नशरे, उम्रस्याभेदेनान्वयः क्रियते तद्यपि उम्रत्वान्वयादर्शनाच्छरे उस्राभेदो बाधित एव। तथा चाभेदेनाप्यन्वयो न संभवतीति भावः। वस्तुतस्तु इवशब्दसमभिव्याहारे उम्रपदस्यैवोस्रसदृशार्थकतया एकपदो पस्थाप्यत्वेनोस्रसदृशयोः परस्परमन्वय एव नास्तीति तदेकदेशस्य सदृशस्य विशेष्य भूतस्य शरैः सहाभेदान्वये बाधकाभावः। राजपुरूषमानयेत्यत्र राजपुरूषपदा

थैकदेशस्य प्रधानस्य पुरुषस्यानयनक्रियायामन्वयवत् तत्रान्वय आग्रहश्चेत् उम्रनिरूपितसादृश विशिष्ट इत्येवमुस्र सदृशयोर्भेदेनान्वय इति उस्रशरपदयोः समानविभक्तिकयोरभेदान्वये न किञ्चिद् बाधकम्। वागर्थाविव इत्यत्रापि वागर्थपदस्यैव वागर्थसदृशार्थकत्वात्तस्य च पार्वतीपरमेश्वररूपकर्वणा सहाभेदन्वयः । सादृश्यं चोपस्थिततत्वात्संपृक्तत्वेन बोध्यम्। संपृक्तत्वं च नित्यसंबद्धत्वम्। यथा वागर्थौ नित्यसंबद्धौ तथा नित्यसंबद्धौ पार्वतीपरमेश्वरावित्यर्थः। एवं च नित्यसंबद्धवागर्थसदृशाभिन्नपार्वतीपरमेश्वरकर्मकं वन्दनमिति बोधः।

शरैरुपैरित्यत्रापि उद्धरण क्रिया साधनत्वेन सादृश्यम्। यथोस्रा रसोद्धरण क्रियासाधनं, तथा शरा अपि नृपोद्धरणक्रियासाधनम्। तथा चोद्धरणसाधनभू तोस्रसदृशाभिन्नशरकरणकं नृपोद्धरणमिति बोधो ज्ञेयः।

नागेशमते केषाञ्चिन्निपातानां द्योतकत्वम्। अत एव नेत्यनेनाभावबोधः, कस्याभाव इत्याकाङ्क्षा च सङ्गच्छते। अत एव 'आनो दिवः पर्वता' इत्यादौ 'आ' इत्यस्यार्वागित्यर्थेन 'दिग्लक्षणापञ्चमी' इति निरूक्ते उक्तम्। किञ्च द्योत्यस्य विशेषणत्वमेव । अत एव 'स्त्रयामिति' सूत्रे वाचकतापक्षे स्त्रीत्वस्य प्राधान्यमाशङ्क्य द्योत्यत्वेन समाहितं भाष्ये। 'हेतुमति च' इत्यत्रापि भाष्ये प्रकृत्यर्थविशेषणाय णिचो द्योतकत्वमुक्तम्।

हरिणाप्यक्तं वाक्यपदीययस्य द्वितीयकाण्डे –

निपाताः द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः॥[7] इति।

अत एव चतुष्टयी शब्दानां प्रवृत्तिः नामाख्यातोपसर्गनिपाताः इति भाष्ये उक्तम् । एवञ्च द्योत्यार्थस्य विशेषणत्वनियमेन 'उस्रसदृशैः शरैरिति' इति बोधोऽपि न युक्तः। किञ्च सदृशपरत्वे उपमानवाचकत्वाभावात् उपमानानि सामान्यवचनैः" इति समासानुपपत्तिः।

विग्रहे तु सदृशपरत्वेन भूतपूर्वगत्यापि न निर्वाहः । 'धनेन तुल्यम्' इति तु न विग्रहः 'मृगीव चपला' इत्यर्थे मृगचपला' इत्यादौ पुंस्त्वानापत्तेः। केवलघनादिशब्दप्रयोगे 'घनः' इत्यादावुपमानवाचकत्वस्य दुवर्चतयाऽपि भूतपूर्वगतिरयुक्तैव। किञ्च 'घनश्यामि' त्यादौ श्यामस्यौपमेयेऽन्वयादेवोपमेयमात्रवाचकतयोपमानोपमेययोः साधारण धर्मवाचकत्वानुपपत्तिः। अत एव भाष्ये उक्तम्-यदि शास्त्रीव श्यामा देवदत्ता इति विग्रहस्तदा श्यामेत्येतदपेक्ष्यं स्यात्। अयं भावः-श्यामापदार्थस्य देवदत्तायामन्वयेन स्त्रियां श्यामत्वं न प्रतीयेत इति तत्र 'श्यामा' इत्यध्याहारणे योजनीयं स्यादिति। यदि यथा शास्त्री श्यामा तद्वदेवदेवदत्तेति विग्रहस्तदा देवदत्तायां श्यामेत्ययेतदपेक्ष्यं स्यादिति। एवं तस्यामेवोभयं वर्तते इति भाष्ये[8] सिद्धान्तितम्।

मीमांसकास्तु-वाचका एवैते निपाताः न द्योतका इति वदन्ति इत्थं हि तैरुक्तं समुच्चयाधिकरणे-केवलवृक्षशब्दात् समुच्चयाप्रतीतेश्चकारश्रवणे तद्बोधाच्चकार एव तद्वाचको, न द्योतकः । किञ्च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या, चकारस्य च द्योतकताशक्तिः सङ्गच्छते।

निपातानां वाचकत्वे नञः शक्यार्थसद्भावच्छक्यार्थसम्बन्धरूपलक्षणायाः संभवात् पूर्वोक्तमीमांसा द्वयोक्तिः संगता भवति। द्योतकत्वे तु निपातानां शक्यार्थाभावाच्छक्य सम्बन्धघटितलक्षणाया असंभवान्न सोक्तिः संगता भवेदित्यर्थः । तस्मादिदं मीमांसकमतमयुक्तम्। अनन्यलाभ एव हि शक्यार्थ इति न्यायेन पदान्तराल्लक्षणयैव समुच्चयाद्यर्थप्रतीतेः पुनस्तत्र शक्तिकल्पनायोगात्। अत एव लक्षणयैव तीरोपस्थितौ सत्यां न पुनस्तत्र गङ्गापदस्य शक्तिः कल्प्यते। अन्यथा गङ्गादिपदानामपि तीरादौ शक्तिः कल्प्या स्यात् चादिनिपातसमभिव्याहारे वृक्षादिपदाद्विशिष्टार्थ प्रतीतिः, तदसमभिव्याहारे पदान्तराद्विशिष्टार्थप्रतीत्यभाव वाचकत्व साधकौ भवतः। न च वाचकत्वे पदान्तराणां निपातद्योत्यार्थे शक्तिः चकारस्य द्योतकताशक्तिश्चेति शक्तिद्वयकल्पनेति वाच्यम् अत आह -

वैयाकरणभूषणसारस्य निपातार्थनिर्णये -

निपातानां वाचकत्वमन्वयव्यतिरेकयोः।

युक्तं वा न तु तद्युक्तं परेषां मतमेव नः॥[9] इति।

अर्थात् मीमांसकानां यन्मतं वाचकत्वमात्ररूपं तदेवास्माकं मतमिति न युक्तम्। किन्तु केचिद्वाचकाः केचियोतकाः। तदुक्तं वाक्यपदीये -

स वाचको विशेषाणां संभवाद्योतकोऽपि वा॥ इति।

एवं च धात्वर्थप्रातिपदिकार्थयोर्भेदेनान्वयबोधो न व्युत्पन्न इति निपातातिरिक्तविषयं समानाधिकरणप्रातिपदिकार्थरभेदान्वय इत्यपि तथेत्यगत्या कल्पनीयम्। अत एव 'ओदनः पचति' इत्यत्र निपातातिरिक्तप्रातिपदिकार्थस्यौदनस्य कर्मता सम्बन्धेन धात्वर्थे पाकेऽन्वयो न भवतीति ओदन कर्मक: पाक इत्येवं न ततो बौधो जायते। निपातातिरिक्ततिनिवेशान्निपातार्थधात्वर्थयो र्भेदेनान्वयो नाव्युत्पन्न इति प्रजयतीत्यत्र निपातरूपप्रातिपदिकार्थस्य प्रकर्षाश्रयतासम्बन्धेन जिधात्वर्थे जयेऽन्वयो भवतीति ततः प्रजयतीतिरूपपद्यते। इत्थं निपातानां वाचकत्वे यथायथं दोषाभावेऽपि क्वचिद्योतकत्वमपि स्वीकार्यम्। अन्यथा प्रतिष्ठते' इत्यत्र गमनतवरुपेणानुभवसिद्धो बोधो न स्यात्। नामार्थधात्वर्थयोर्भेदनान्वयो न व्युत्पन्न इति व्युत्पत्तेर्निपातेतरत्वेन संकोचेऽपि प्रोपसर्गस्याभावे शक्तौ स्वीकृतायामपि धातोर्गतिनिवृत्यर्थकत्वेन गतिनिवृत्तिरूप धात्वर्थस्य प्रतियोगित्वसम्बन्धेन प्रोपसर्गवाच्येऽभावेऽन्वयेन गति निवृत्ति प्रतियोगिकाभाव इति बोधात् गमननिवृत्यभावत्वरूपेणैव बोधः स्यात्। द्योतकत्वे तु तिष्ठ तेर्धातोरेव लक्षणया गतिप्रतिपादकत्वाद् गमनत्वरूपेण बोधोऽनायासेन सिध्यति।

उपसर्गाणां द्योतकत्ववाचकत्व विचार सारः - अस्मिन् प्रकरणे उपसर्गनिपातानामुल्लेखः, तेषामर्थविचारः एवं च तेषां च द्योतकत्वं वाचकत्वं वेति विचारो विवेचितो वर्तते। शब्दशक्तिप्रकाशिकाकारः अपि निपातानामर्थविषये एवं प्रत्यपादयत् यत् चादीनां निपातानामपि केवलेन अर्थबोधने सामर्थ्य न भवति किन्तु प्रातिपदिकार्थेन सह अन्वयेनैव। इमे च निपाताः अनेकविधः स्वरादिचादिभेदेन। यद्यपि अन्यनैयायिकाः प्रादीनां धातोः प्राक् प्रयुक्तानामुपसर्गाणां द्योतकत्वं स्वीकुर्वन्ति, चादीनाञ्च वाचकत्वं "साक्षात् प्रत्यक्षतुल्ययोः"[10] इति अमरकोशबलात्। परञ्च वैयाकरणानामत्र आपत्तिः । तेषामयमाशयः यत् यथा प्रादीनां द्योतकत्वं चादीनामपि तथैव अथवा चादीनां यथा वाचकत्वं प्रादीनामपि तथैव तयोर्वैषम्ये बीजाभावः। तदुक्तं वैयाकरणभूषणसारे -

द्योतकाः प्रादयोः येन निपाताश्चादयस्तथा।
उपास्येते हरिहरौ लकारो दृश्यते यथा॥[11] इति॥

'अनुभवति' इत्यत्र अनुभवरूपः अर्थः न केवलस्य अनुमात्रस्य उपसर्गस्य । यतोहि तथा स्वीकारात् अनुकरोत्यादावपि अनोर्विद्यमानत्वात् तत्रापि अनुभवार्थः आपद्येत। न केवलस्य धातोरेव अनुभवोऽर्थः। 'अनुभवति' इत्यादौ यदि भूधातोरेव अनुभवः अर्थः स्वीक्रियेत तदा 'प्रभवति उद्भवति इत्यादावपि भवतेर्विद्यमानत्वात् तत्रापि अनुभवार्थः आपद्येत। भर्तृहरिरपि अस्मिन् विषये द्योतिका, वाचिका वा स्युः इत्युक्त्वा उभयत्रापि उभयं स्वीकरोति। तदुक्तं वाक्यपदीये -

निपाता द्योतकाः केचित् पृथगाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः॥[12] इति॥

वस्तुतस्तु वैयाकरणा: उभयत्रापि द्योतकत्वमेवाङ्गीकुर्वन्ति। यतोहि चादीनां प्रातिपदिकेन अन्वयं विना नार्थबोधनक्षमत्वम्। अत एव -

शरैरुपैरिवोदीच्यानुद्धरिष्यन् रसानिव।
इत्यादावन्वयो न स्यात् सुपाञ्च श्रवणं ततः।[13] इति॥

अयञ्चोस्रादिशब्दानां तत्सदृशपरत्वे इव शब्दस्य द्योतकत्वे सत्येव सङ्गच्छते। प्रादीनां च धातुं विना नार्थबोधनक्षमत्वम्। अत एव उक्तं शब्दकौस्तुभे भट्टोजिदीक्षितेन -

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।

प्रहारहारसंहारविहारपरिहारवत्।।

वैयाकरणभूषणसारे चादीनां निपातानाम् अर्थवोधनप्रकारः विस्तरेण प्रोक्तः।

सन्दर्भ ग्रन्था


1. शब्दकौस्तुभे कारिका
2. शब्दशक्तिप्रकाशिका कारिका - ११
3. वैयाकरणभूषणसारः निपातार्थनिर्णयः कारिका – ४२
4. वाक्यपदीयं द्वितीयकाण्डम् कारिका – १८४
5. वाक्यपदीयं द्वितीयकाण्डम् कारिका – १८६
6. वैयाकरणभूषणसारः निपातार्थनिर्णयः कारिका - ४५
7. वाक्यपदीये द्वितीयकाण्डम् कारिका – १६२
8. 'उपमानानि सामान्यवचनैः' इति सूत्रे महाभाष्ये
9. वैयाकरणभूषणसारः निपातार्थनिर्णयः कारिका - ४७
10. वाक्यपदीयम् क्रियासमुदेशः कारिका-04
11. वैयाकरणभूषणसार निपातार्थनिर्णयकारिका-42
12. वाक्यपदीय द्वितीयकाण्डकारिका-182
13. वैयाकरणभूषणसारनिपातार्थनिर्णयकारिका-45